न चात्र मम दूषणं परमिदं तु मे भूषणं
यतो झटिति वाचतः सरलमेव संजायते ॥ ३ ॥

इति श्रीमद्वैद्यकुलतिलकायमानश्रीकृष्णपंडितात्मजनागनाथकृतो निदानप्रदीपः समाप्तः ॥

For another MS. of this work (foll. 680 !), omitting the first introductory stanza and ending differently, see Rāj. Mitra's Cat. of Bikaner MSS., p. 652, where the work is called a gloss on the *Mādhavanidāna* (cf. Aufr., Cat. Cat.).

[H. T. COLEBROOKE.]

## 2672.

**573.** Fol. 217 (counted 218, no. 18 being passed over); size 11½ in. by 4¾ in.; stiff, but clear Devanāgarī writing of about 1750 A.D.; 10–13 lines in a page.

*Siddhayoga,* a work on the treatment of maladies, by *Vṛinda.* It is arranged on the plan of *Mādhava's Rugviniścaya,* as the author states in the introduction :

ध्यात्वा शिवं परमतत्त्वविचारवेद्यं
  चंडीमभीष्टफलदां सगणं गणेशं ।
धन्वंतरिं मुनिवरं मुनिसुश्रुतादीन्
  चात्रेयमुग्रतपसं मनसा प्रणम्य ॥

नानामतप्रथितदृष्टफलप्रयोगैः
  प्रस्तावचाक्यसहितैरिह सिद्धयोगः ।
वृंदेन मंदमतिनात्महितार्थिनायं
  संलिख्यते गदविनिश्चयत(*r.* यत् or तत्)क्रमेण ॥

शास्त्रं गुरुमुखोत्तीर्णमादायोपास्य चासकृत् ।
यः कर्म कुरुते वैद्यः स वैद्यो ऽन्ये तु तस्कराः ॥

नैव कुर्वीत लोभेन चिकित्सापण्यविक्रयं ।
ईश्वराणां वसुमतां लिप्सेतार्थानुवृत्तये ॥

चिकित्सितं शरी[रं] यो न निष्क्रीणाति दुर्मतिः ।
स यत्करोति सुकृतं तत्सर्वं भिषगश्नुते ॥

Cf. Aufrecht, Oxf. Cat., nos. 750, 849, 850 (where an analysis of the contents is given). The MS. is incomplete, breaking off in the middle of the *strīrogādhikāra.*

A different hand has then supplied the fictitious colophon: इति श्रीधन्वंतरीविरचितः सिद्धयोगः समाप्तः, which was readily adopted by Dietz, Anal. Med., p. 127.

[H. T. COLEBROOKE.]

## 2673.

**710.** Fol. 231; size 16 in. by 5¼ in.; good modern Bengalī handwriting; eight lines in a page.

*Gūḍhabodhakasaṃgraha,* a work on pathology, by *Herambasena Sahapatnī,* son of *Śubhasena.*

It begins :

नमो गणेशाय शिवात्मजाय
  गजेन्द्रवक्त्राय चतुर्भुजाय ।
विघ्नघ्ननाशाय वरप्रदाय
  योगात्मने सिद्धिसुसेवकाय ॥

चक्रपाणिपदद्वन्द्वं वन्दे वन्द्यं महेश्वरं ।
माधवं नित्यनाथं च नित्यं मूर्ध्नि कृताञ्जलिः ॥

यत्प्रसिद्धं तदत्रास्ति यच्च द्रोगेषु यौगिकं ।
तत्तत्सर्वं प्रयत्नेन सारमेव कृतं मया ॥

रसरत्नाकराच्चक्रादन्यपुस्तकसंकुलात् ।
महेश्वरात्समाकृष्य संग्रहो गूढबोधकः ।
धन्वन्तरिकुलोद्भूतशुभसेनसुतेन च ।
हेरम्बसेनभिषजा सहपत्न्या प्रकाशितः ॥

कर्मजा व्याधयः केचिद् दोषजाः सन्ति चापरे ।
कर्मदोषोद्भवाश्चान्ये कर्मजा दैवहेतुकाः ॥

यथाशास्त्रं विनिर्णीतो यथाव्याधि चिकित्सितः ।
न समं(*r.* शमं) याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः ॥

अल्पदोषो गरीयान्यः स ज्ञेयः कर्मदोषजः ।
कर्मक्षयात्कर्मकृतो दोषजः सुखमौषधैः ॥

ये वा गदाः स्युरपरे द्रविणापहार-
  गुर्वङ्गनागमनविप्रवधादिभिश्च ।
दुष्कर्मभिस्तनुभृतामिह कर्मजास्ते
  नोपक्रमेण भिषजामायान्ति सिद्धिं ॥

दानैर्दयाभिरतिथिद्विजदेवतागो-
  गुर्वर्चनाप्रणतिभिश्च जपैस्तपोभिः ।
इत्युक्तपुण्यनिचयैरुपचीयमानाः
  प्राक्कर्मजा यदि रुजः प्रशमं प्रयान्ति ॥

स्वहेतुदुष्टैरनिलादिदोषैरुपप्लुतैः खेषु परिस्खलन्ति ।
भवन्ति ये प्राणभृतां विकारास्ते दोषजा [विकाराः]
[सिद्धिसाध्याः(?) ॥ ०

It ends fol. 222*a* : ततश्चतुर्वेटीः स्वाद्रकस्वरससंयुताः खादेत् ॥ श्लेष्मशैलेन्द्ररसः ॥ इति हेरम्बसेनविरचितो गूढबोधकसंग्रहः समाप्तः ॥

सत्यमेव जयते

Then follows, for comparison, an *index rerum* to the *Rugviniścaya*, in nine *ślokas*, beginning:

ज्वरो ऽतिसारो ग्रहणी अर्शो जीर्णो विसूचिका ।
आलमको विलम्बी च क्रिमिरुक् पाण्डुकामला ॥

and ending:

क्षुद्रास्यकर्णनासादृक्शिरोस्त्रीबालकामयाः ।
विषं चेति समुद्दिष्टा रुग्विनिश्चयसंग्रहे ॥

Then follows an index on eight leaves, and an additional leaf containing the following note: ग्रन्थकारस्य वंशपरम्परा । धन्वन्तरि° *śl.* 5 above ॥

एतानि ग्रन्थसंमतानि । तेषां नामानि । रसरत्नाकर १ । चक्रदत्त २ ॥ माहेश्वर ३ । निदान ४ । वाभट ५ । चरक ६ । एतानि षट् ग्रन्थसंमतानि ॥

Cf. Dietz, Anal. Med., p. 138; Rāj. Mitra, Notices, i., p. 110, where in the fourth introductory *śloka* चन्द्रात् is a mistake for चक्रात्, copied in Cat. Cat. s.v. गूढबोधकसंग्रह.

[H. T. COLEBROOKE.]

## 2674.

**851.** Fol. 170; size 12¼ in. by 5¼ in.; good Devanāgarī writing of about 1600 A.D.; nine (foll. 64–138 eight) lines in a page.

*Cikitsāsaṃgraha*, a compendium of pathology, by *Cakrapāṇidatta* (*Cakradatta*)—of the *Lodhravalī* branch of the *Datta* family—son of *Nārāyaṇa* (minister, and superintendent of the culinary department, of King *Nayapāla* of Bengal), and younger brother of *Bhānu*.

The work is chiefly based on those of *Heramba* and *Vṛinda*.

Another MS. of this work (incomplete at the end) is noticed in Rāj. Mitra's Notices, ii., p. 71. An edition of the work (चक्रदत्तः । चक्रपाणिदत्तविरचितः । pp. 538) was published at Calcutta in 1872. Like it, our MS. begins:

गुणत्रयविभेदेन मूर्तित्रयमुपेयुषे ।
त्रयीभुवे (त्रयीशाय R.M.) त्रिनेत्राय त्रिलोकीपतये [नमः ॥

नानायुर्वेदविख्यातसद्योगैश्चक्रपाणिना (सद्योगचक्र° [R. M.) ।
क्रियते संग्रहो गूढवाक्यबोधकवाक्यवान् (°कराक्षरः [R. M.) ॥
रोगमादौ परीक्षेत ततो ऽनन्तरमौषधं ।
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥

Between foll. 63 and 64 there is a large gap extending, in the edition, from p. 148, l. 5 to p. 313, l. 9; the leaves from 64 to the end having been numbered by a different hand from those before.

At the end a leaf is lost, the MS. ending in the third *pāda* of the first of two final *ślokas*, which (as partly supplied from the edition and commentary) run as follows: मुख्याचाराधिकारः ॥

गौडाधिनाथरसवत्यधिकारिपात्र-
नारायणस्य तनयः सुनयो ऽन्तरङ्गात् ।
भानोरनु प्रथितलोध्रवली [कुलीनः
श्रीचक्रदत्त इह कर्तृपदाधिकारी ॥
यः सिद्धयोगलिखिताधिकसिद्धयोगान्
अत्रैव निक्षिपति केवलमुद्धरेद्वा ।
भट्टत्रयत्रिपथवेदविदा जनेन
दत्तः पतेत्सपदि मूर्धनि तस्य शापः ॥]

Cf. Dietz, Anal. Med., p. 133.

According to the introduction to the author's *Āyurvedadīpikā* (Rāj. M., vi., p. 223), he was the pupil of *Naradatta*.

[H. T. COLEBROOKE.]

## 2675.

**57a.** Foll. 70; size 10½ in. by 4½ in.; legibly written, in Devanāgarī, in the latter part of last century; 10–12 lines in a page.

*Cikitsāsaṃgraha.* Incomplete; the MS. terminating shortly after the *sarvavātaghnamāsha-taila* (Calc. ed. p. 175).

The first leaf of the MS. does not belong to this work, but to the *Rasendracintāmaṇi* by *Rāmacandra* (for which see no. 2755). The title of that work has, however, been effaced in the

introduction, and चक्रदत्तनाम [ग्रंथमारभमाणस्] written over it; whence a later hand, which has supplied the colophon on the last leaf (70), makes the work to be श्रीकुहकुलसंभवश्रीरामचंद्रविरचितश्चक्रदत्तनामको ग्रंथः। This is the reason why *Cakradatta* appears as the *title* of the work in Dietz' Anal. Med., p. 141; and in a note to the Oxf. Cat. p. 470; as, indeed, it does in the Calcutta edition; whilst the commentary calls the work *Cakrasaṃgraha.*

[H. T. COLEBROOKE.]

## 2676.

**300.** Foll. 241; size 13¾ in. by 4¾ in.; fairly good Bengalī writing of 1807 A.D.; eight lines in a page.

*Tattvacandrikā,* a commentary on *Cakradatta's Saṃgraha*—mainly condensed from a previously existing commentary entitled *Ratnaprabhā* — by *vaidyamahāmahopādhyāya Śivadāsasena Yaśodhara,* son of *Ananta,* and grandson of *Uddharaṇa.*

It begins (the MS. has often श for स):

यः सप्तवर्षदेशीयो दधार धरणीधरं।
कंसध्वंसकरं वन्दे तं देवं देवकीसुतं॥
तातः किमम्ब मातेति यं दृष्ट्वा दृष्टपूर्वकं।
अभूत् स्कन्दे ऽपि संदेहस्तं देहं शिवयोर्भजे॥
टीका रत्नप्रभा चक्रदत्तनिर्मितसंग्रहे।
यद्यप्यास्ते तथाप्येष संक्षेपाय ममोद्यमः॥
विस्तरोक्तं च संक्षिप्य प्रतिक्षिप्य च दुर्वचः।
व्याख्यान्तरं च निक्षिप्य टीकेयं क्रियते मया॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं प्रारिप्सितग्रन्थसमाप्तिफलकं ° बध्नाति। गुणत्रयेत्यादि। गुणत्रयं सत्त्वरजस्तमोरूपं मूर्तित्रयं ब्रह्महरिहरस्वरूपं॥ १॥ प्रेक्षावत्प्रवृत्त्यर्थं संबन्धाभिधेयप्रयोजनमाह। नानायुर्वेद इत्यादि॥ सदिति सिद्धिफलं गूढवाक्यं गूढार्थं वचनं तद्बोधकं तदर्थप्रतिपादकं यद्वचनं यद्युक्तः(?) यथा नवज्वरे षडङ्गादिभेषजविधानं तथा तत्रैव न दद्यात्तत्र भेषजमिति भेषजनिषेधो ऽपि। अतो विधिनिषेधयोरेकत्र विषयत्वेन विरोधः स्यात् यतस्तत्परिहारार्थं मुख्यभेषजसंबन्धो निषिद्ध इत्यादिवचनं निषिद्धमिति संग्रहेण सह सद्योगानां वाच्यवाचकलक्षणः संबन्धः सद्योग एवातिरेके अवान्तरप्रयोजनं च चिकित्सितं मुख्यं चारोग्यमिति॥ २॥ अथ चिकित्साक्रममाह। रोगमित्यादि॥

The commentator thus does not take "गूढवाक्यबोधक" to refer to *Heramba's Gūḍhabodhakasaṃgraha,* as one might at first sight think to be the case; whilst, in his interpretation of the final stanza, he takes *Cakradatta* to specify *Vṛinda's Siddhayoga* as his principal authority.

The author of the *Cikitsāsaṃgraha* is variously called *Cakra* (fol. 203*b*, l. 3), *Cakradatta* (as above and fol. 38*a*, l. 3), *Cakrapāṇi* (fol. 83*a*, l. 6; fol. 132*b*, l. 6), and *Cakrapāṇidatta* (fol. 195*b*, l. 5; fol. 228*b*, l. 7).

Like the text of MS. 851, this commentary also is imperfect in the middle, although the pagination does not show it. Foll. 132–138 are written in a different hand from the rest. They continue the subject of the preceding pages and bring it up to *aśmarīcikitsā* (p. 250 of the ed. of the text). After this a large gap occurs, fol. 139 treating already of *netrarogacikitsā* (ib. fol. 406), after which the work is carried on to the end.

The commentator concludes with an explanation of the final verses of the *Saṃgraha*, after which he gives an account of his own lineage:

इति मुख्याधिकारः॥ इदानीं ग्रन्थसमाप्तौ पित्रादीनामुत्कीर्तनं निवेशयन्नाह॥ गौडाधिनाथेत्यादि॥ गौडाधिनाथो नयपालदेवः तस्य रसवती महानसं तस्याधिकारी तथा पात्रमिति मन्त्री च। उक्तं हि मेदिनीकरेण यथा। ईदृशो यो नारायणस्तस्य तनयः सुनय इति नीतिमान्। अन्तरङ्गादिति लब्धान्तरङ्गपदवीकृता[द्] भानोरनु नारायणस्य तनय इति योज्यं तेन भानोरनुज इत्यर्थः। विद्याकुलसंपन्नो हि भिषगन्तरङ्ग इत्युच्यते। लोध्रवलीकुलीन इति लोध्रवलीसंज्ञकदत्तकुलोत्पन्नः॥ न(r. य) इत्यादि। सिद्धयोग इति वृन्दकृतसंग्रहस्य संज्ञा तल्लिखितयोगमपेक्ष्याधिकाः सिद्धयोगाः संग्रहे उक्तास्तानधियोगान् तत्रैव सिद्धयोगे यो निक्षिपति

तथा यो वा तानधिसिद्धयो[गा]न् इति संग्रहादुद्धरेद्दूरीकुर्यात्तस्य ये ऽत्र कीदृशेन भट्टत्रयत्रिपथवेदविदा कारिकावृहट्टीकातन्त्रटीकेति भट्टत्रयं त्रिपथो वेद ऋग्यजुःसामरूपः तद्विदा ॥

असद्व्याख्यानतमसा जगदन्धीकृतं तन्नाशिका अस्माभिर्निर्मिता तत्त्वचन्द्रिका ॥

आसीत्सभायां शिखरेश्वरस्य
लब्धप्रतिष्ठः किल माडसेनः ।
वाणीविलासं कविसार्वभौमं
विजित्य यः प्राप यशो दुरापं ॥

काकुत्स्थसेनस्तनयस्ततो ऽभूत्
ततो ऽपि लक्ष्मीधरसेननाम्ना(?॰नामा) ।
तस्मादभूदुद्धरणस्तनूजस्
तस्मादनन्तस्तनयो ऽथ जज्ञे ॥

⏑̱ – ⏑ – – ⏑ ⏑ – ⏑ – –
मालंचिकाग्रामनिवासभूमिः ।
गौडावलीलोकहिते चकार
टीकामिमां श्रीशिवदाससेनः ॥

टीकासु पूर्वैर्विहितासु ये ऽर्था
ये वा गुरुभ्यो ऽधिगता मयापि ।
सन्त्यत्र ते विस्तरसंभ्रमेण
टीकान्तरान्वेषणजेन धीराः ॥

इति श्रीशिवदाससेनकृता तत्त्वचन्द्रिकाख्या चक्रसंग्रहटीका समाप्ता ॥ Cf. Dietz, Anal. Med., p. 136.

[H. T. COLEBROOKE.]

## 2677.

**902.** Foll. 227; size 15 in. by 5 in.; fair, modern Bengali handwriting; eight lines in a page.

*Siddhayogārṇava*, a compendium of pathology, by *Rājīvalocana Dhanvantari*, son of *mahopādhyāya Vaidyakaṇṭhābharaṇa* and *Śrīmatī*.

It begins:

पत्रालीं लेखयन्त्याः प्रसभमभिगते कैतवात्कैटभारौ
यस्या लज्जानतायाः पदकमलभुजातसंचारजाड्यं ।
कोकानन्दच्छिदेव श्रितमुकुलमहामुद्रमास्यस्य भासा
सा पद्मा कम्बुकण्ठी वितरतु भवतां भूतये मङ्गलानि ॥

गौरीशपादकमलं विनिधाय मौलौ
भक्तिप्रपन्नजनवाञ्छितकल्पवृक्षं ।
राजीवलोचनभिषक् कुरुते सुसिद्ध-
योगार्णवं त्वखिलवैद्यहिताय योगैः ॥

पैशुन्यशून्यभिषजां विविधैर्विचारैः
काव्यैर्निजैः सरसगुम्फमयैः कवीनां ।
योगैर्वरै रसमयैश्च चिकित्सकानाम्
आनन्दसन्ततिकरो ऽत्र मम श्रमो ऽस्तु ॥

अथातो गुरुवन्दनं ॥

नमो ऽस्तु गुरवे तस्मै सच्चिदानन्ददायिने ।
दुःखार्णवनिमग्नानां यद्वाणी तरणिर्भवेत् ॥

नमो ब्रह्मप्रजापत्यश्विशक्रभरद्वाजात्रेयाग्निवेशेभ्यः ॥

दीर्घजीवितमन्विच्छन् भरद्वाज उपागमत् ।
इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरं ॥

ब्रह्मणा हि पुरा प्रोक्तमायुर्वेदं प्रजापतिः ।
जग्राह निखिलेनादावश्विनौ पुनस्ततः ॥

अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे तु केवलं ।
ऋषिप्रोक्तो भरद्वाजस्तस्मात् शक्रमुपागतः ॥

विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणां ।
तपोपवासाध्ययनब्रह्मचर्यव्रतायुषां ॥

तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः ।
समेताः पुण्यकर्माणः पार्श्वे हिमवतः शुभे ॥

अङ्गिरा जमदग्निश्च वशिष्ठः काश्यपो भृगुः ।
आत्रेयो गौतमः सांख्यः पुलस्त्यो नारदो ऽसितः ॥ ॰

The work is divided into 10 chapters (*upadeśa*), viz.:—

I. *cikitsitāṅga*, ends: निदानमानादि विहाय सिद्धयोगार्णवे विस्तरशङ्कितेन । चिकित्सिताङ्गं कियदेव योग्यं सद्वैद्यधन्वन्तरिणा व्यलेखि ॥ इति श्रीश्रीमतिसंभवमहोपाध्यायश्रीवैद्यकण्ठाभरणात्मजश्रीराजीवलोचनधन्वन्तरिकृतौ सिद्धयोगार्णवे चिकित्सिताङ्गो नाम प्रथमोपदेशः । fol. 16*a*; II. *nānāvidhajvaracikitsita*, fol. 40*a*; III. *jvarātīsārādicikitsita*, fol. 63*a*; IV. *krimyādicikitsita*, fol. 82*a*; V. *vātavyādhyādicikitsita*, fol. 115*a*; VI. *amlapittādinivāraṇa*, fol. 171*b*; VII. *pradarādinivāraṇa*, fol. 190*a*; VIII. *rasāyanādivijñāna*, fol. 202*a*; IX. *snehaprakriyādivijñāna*,

fol. 217*a*; X. *rasādiśuddhyādivijñāna*, ends:—
इति श्रीमति(corr. into श्रीमती)संभव ° दशमोपदेशः ॥

सो ऽयं मयोक्तो हि दशोपदेशैर्ग्रन्थो मुनीनां मतसारगर्भैः ।
शास्त्रप्रपञ्चेन समानसानामानन्दधारां तनुतामुदाराम् ॥

य उक्ताः स्वयन्ये प्रचुरविषयाः पूर्वमुनिभिः
सुखार्थं भूतानां विविधपरिपाटीपरिचिते ।
प्रयोगास्तान् सिद्धाश्रयनविषयीकृत्य सुधियो
मदीये ग्रन्थे ऽस्मिन्निदधतु मनः सारबहुले ॥

The work, from the second chapter onwards, seems chiefly based on that of *Cakrapāṇi*, as the latter (see no. 2674) was on those of *Heramba* and *Vṛinda*.

Several times the author refers to his own *Ratnāvalī*, viz. fol. 15*a* [मदीयरत्नावल्यां । गदार्त्तो नाचरन्पथ्यं भेषजं किमपेक्षत । °], foll. 16*b*, 20*b*, etc.

Cf. Dietz, Anal. Med., p. 142.

[H. T. COLEBROOKE.]

## 2678.

**1302.** Foll. 116 (numbered 117; numbers 19 and 82 occurring twice, and 42, 55 and 92 being omitted); size 13½ in. by 6¼ in.; small, modern Bengali handwriting; eight lines in a page.

*Prayogaratnākara*, a treatise on therapeutics, by *Kavikaṇṭhahāra*.

It begins:

प्रणम्य देवीचरणारविन्दं समीक्ष्य तन्त्राणि च संग्रहांश्च ।
भिषग्वरः श्रीकविकण्ठहारः प्रयोगरत्नाकरमातनोति ॥

ये हि सिद्धफला योगा वृद्धा व्यवहरन्ति यान् ।
तानेव व्यवहारार्थं समासात्प्रविचक्ष्महे ॥

रसस्यापि प्रयोगा हि वाच्याः सिद्धफलास्त्विह ।
चतस्तदुपयोगित्वात्प्रक्रियागौरवादपि ।
आदावेव रसादीनां वक्ष्यामि शोधनादिकं ॥

तत्र रसप्रशंसा ।

हरति सकलरोगान् मूर्छितो यो नराणां
वितरयति सुबद्धः खेचरत्वं जवेन ।
सकलसुरमुनीन्द्रैर्वन्दितं शम्भुबीजं
स जयति भवसिन्धोः पारदः पारदो ऽयं ॥

दोषहीनो रसो ब्रह्मा मूर्छितो हि जनार्दनः ।
मारितो रुद्ररूपः स्याद्बद्धः साक्षात्सदाशिवः ॥

रसलक्षणमाह ।

स्वतः सुनीलो बहिरुज्ज्वलश्च मध्याह्नसूर्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डुरश्च चित्रो न योज्यो रसकर्म-
[सिद्धै ॥

विष्णुं शिवं समभ्यर्च्य दिक्पालांश्च नव ग्रहान् ।
योगिनीं क्षेत्रपालं च वटुकं च गणाधिपं ॥

शुभे ऽहनि शुभे लग्ने रसकर्म समाचरेत् ।
शतादिपलपर्यन्तं गृह्णीयात् शोधने रसं ॥

Having described the chemical preparation of metals (*rasa*) [fol. 9*a*], and semi-metals (*uparasa*) [fol. 24*b*], and the use of animal and vegetable products such as milk and oil (*rasāyana*) [fol. 37*b*], he enters on his subject proper: *sarvarogacikitsā*, the application of the different medicines to particular maladies, which he arranges in the following order: 1. *jvara* (foll. 39*b*–54*b*); 2. *jvarātīsāra* (fol. 57*a*); 3. *atīsāra* (fol. 61*b*); 4. *grahaṇī* (fol. 67*b*); 5. *arśa* (fol. 73*b*); 6. *agnimāndya* (fol. 78*a*); 7. *krimi* (fol. 79*b*); 8. *pāṇḍu-kāmalā-halīmaka* (fol. 83*b*); 9. *raktapitta* (fol. 86*a*); 10. *rājayakshma* (fol. 89*b*); 11. *kāsa* (fol. 92*a*); 12. *hikkā-śvāsa* (fol. 93*a*); 13. *svarabheda* (fol. 94*a*); 14. *aruci* or *arocaka* (fol. 94*b*); 15. *chardi* (fol. 95*b*); 16. *trishṇā* (fol. 96*b*); 17. *mūrchā* (fol. 97*a*); 18. *pānātyaya* or *madātyaya* (fol. 97*b*); 19. *dāha* (fol. 98*a*); 20. *unmāda* (fol. 101*a*); 21. *apasmāra* (fol. 103*a*); 22. *vātavyādhi*. In this chapter the MS. breaks off abruptly in the middle of a verse. Of the remaining part of the work one may form an opinion by comparing it with *Mādhava's Rugviniścaya* (Oxf. MS. 745) upon the plan of which this work seems to be framed. It will be seen that, of the 79 chapters of the *Rugviniścaya*, our work spreads over the first 29 only.

Being frequently quoted in the *Sandehabhañjanī*, a compilation on the preparation of

medicines, printed at Berhampore in 1868, the *Prayogaratnākara* would seem to be a work of some authority in Bengal. The author puts himself sometimes in opposition to the southern school of medicine (*e.g.* दक्षिणात्यास्तु पृथक्शोधनमाहुः fol. 2*a*), and mentions a western school (इति पाश्चात्याः fol. 78*b*).

Of other authorities quoted by him may be noticed: *Garga*, fol. 52*b*; *Pradyumna*, fol. 78*b*; and *Maheśvara*, fol. 88*a* (प्रद्युम्नः पचति महेश्वरो न पचति । fol. 104*b*); *Bhīmaparākrama*, fol. 54*a* (इति गर्गमतं भीमपराक्रममतं च); *Rasaratnadīpa*, fol. 4*a*; *Vishṇu* [? तैलमेतद्(*i.e.* विष्णुतैलं)भगवता विष्णुना परिकीर्तितं fol. 112*a*]; *Śiva*, fol. 2*a* (अष्टादशैव संस्कारा रसस्योक्ताः शिवादिभिः); *Suśruta* (सौश्रुतो योगः) foll. 103*b*, 104*b*.

Cf. Dietz, Anal. Med., p. 151.

[H. T. Colebrooke.]

## 2679.

**73.** Foll. 246, and 13 of Index; size 18¾ in. by 5¼ in.; excellent Bengali handwriting of 1806 A.D.; eight lines in a page.

*Sukhabodha*, a comprehensive work on therapeutics, compiled (in A.D. 1567 or 1702) by *Vaidyarāja*, son of *Viśārada* (son of *Vaidyacintāmaṇi*), and nephew of *Ratnamaṇi*.

It begins:

गीर्वाणवृन्दपरिवन्द्यपदारविन्दम्
आनन्ददेहमभिवन्द्य सुदीनबन्धुं ।
पूर्णेन्दुनिन्दवदनं दयितं तनोमि
श्रीनन्दनन्दनमहं सुखबोधनाम ॥
विख्यातो भुवि सर्वतो गुणगणैश्चिन्तामणिर्धार्मिकः
श्रीमद्वैद्यविशारदो ऽजनि ततः स्ववैद्यतुल्यः क्षितौ ।
विप्राणां परिचारको ऽजनि सुतः श्रीवैद्यराजस्ततः
सो ऽहं चक्र इमं च बालकहितान्वेषी मुदा यत्नतः ॥
पर्यालोच्य निरूपितं मुनिगणैर्ग्रन्थं च नानाविधं
यत्नेनैव निरूप्यते बहुविधो ऽर्थो विदिष्टो मया ।
आयासेन विना यतः शिशुगणज्ञानं द्रुतं जायते
यत्रास्ते रसप्रक्रिया बहुविधा काषायकर्मान्विता ॥

किं दरिद्रस्य विद्याभिर्जराजीर्णस्य किं धनैः ।
आरोग्यमजरा वित्तमत्र यत्नात्प्रपद्यते ॥
अहो केनोपमीयते शास्त्रमेतन्महीपते ।
यत्प्रसादेन निर्विघ्नमुत्तरन्ति भवार्णवं ॥
मृषा सरस्वती लक्ष्मीस्तुल्ये जल्पन्ति दुर्धियः ।
एतच्छास्त्रं सरस्वत्या यल्लक्ष्मीः खलु जन्यते ॥
दुर्गमाः संहिताः सर्वा यद्वित्वा संग्रहं पठेत् ।
अक्षे(? मक्षे) चेन्मधु लभ्यत किमर्थं पर्वतं व्रजेत ॥
अथ शुण्डोपाख्याने ॥
असाध्यः कस्यचिद्रोगः कस्यचिज्ज्ञाननिश्चयः ।
द्वौ प्रकारौ ततो देवो जगाद परमः शिवः ॥
धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमं ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥
अन्यच्च । शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः ।
शरीराद्धर्धते धर्मः पर्वतात्सलिलं यथा ॥
तस्माद्विद्वान् प्रयत्नेन व्याधिवारणमन्त्रणां ।
कारयिष्यति सद्वैद्यैश्चिकित्सां मुनिभाषितां ॥
दीर्घं जीवितमन्विच्छन् भरद्वाज उपागमत् ।
इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरं ॥
ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः ।
जग्राह निखिलेनादावश्विनौ तु पुनस्ततः ॥
अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे हि केवलं ।
ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत् ॥
विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणां ।
मुनयः पुण्यकर्माणः पार्श्वे हिमवतः शुभे ॥
सुखोपविष्टास्ते तत्र पुण्यां चक्रुः कथामिमां ।
प्रादुर्भूतो मनुष्याणामन्तरायो महानयं ॥
कः स्यात्तेषां शमोपाय इत्युक्त्वा ध्यानमास्थिताः ।
अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा ॥
स वक्ष्यति शमोपायं यथावदमरप्रभुः ।
कः सहस्राक्षभवनं गच्छेत्प्रष्टुं शचीपतिं ॥
अहमर्थे नियुक्तो ऽस्मि भरद्वाजो ऽब्रवीत्तदा ।
स शक्रभवनं गत्वा शतक्रतुमथाब्रवीत् ॥
व्याधयो हि समुत्पन्नाः सर्वप्राणिभयंकराः ।
तद् ब्रूहि मे शमोपायान् यथावदमरप्रभो ॥
तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः ।
ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितं ॥°

Cf. *Carakasaṃhitā*, i. 1.

It ends: इति श्रीवैद्यराजकृते सुखबोधे रसकषाये विषरोगाधिकारः ॥

श्रीनाथो वसुरीश्वरं समभजद्गोमूत्रपक्वं यवं
भुक्त्वा प्राणविधारणं सुतपसा मोक्षाय तुष्टः शिवः(?)।
प्रत्यक्षं भृशमादरादुदितवान् ग्रन्थं रुजां नाशकं
त्वं मन्त्रो नय सो ऽपि तं समनयच्चातिप्रहृष्टः सुधीः ॥

पुत्रो ऽजायत सार्वभौमयदुनाथाख्यस्ततस्तत्समो
यो वाचस्पतिना समो ऽजनि ततः श्रीवैद्यवाचस्पतिः।
तस्मात्साधुवरो ऽजनिष्ट तनयः श्रीवैद्यचिन्तामणिस्
तस्माच्छीलविशारदो ऽजनि सुतस्तुल्यो ऽश्विनोर्भूतले॥

तस्माद्भूसुरसेवनोत्सुकमतिः श्रीवैद्यराजो ऽभवत्
सोऽहं संविकलय्य तान्बहुविधान्ग्रन्थान्हितार्थं शिशोः।
चक्रे सारमवाददन्निजमुदे श्रान्त्या तथा यत्नतः
संक्षेपात् सुखबोधनाम जलधिद्विद्रिशशीत्यब्दके ॥

चरकं वाभटं शारङ्गधरं सुश्रुतं तथा।
रसेन्द्रचिन्तामणि-रसेन्द्रकल्पद्रुमावपि ॥

रसरत्नाकर-रसप्रयोगौ रसदीपिकां।
रसमञ्जरीं रसकलिकां च सारसंग्रहं।

परिभाषां च मदनविनोदं वङ्गसेनकं ॥

विलोक्य बालबोधायाक्रियतेदं प्रयत्नतः।
मया पितृव्यश्रीरत्नमणेः पादप्रसादतः ॥

आयुर्वेदसमुद्राच्च गूढार्थमणिसंचयः।
जातः कैश्चिद्बुधैस्तैस्तु कृता विविधसंहिताः ॥

कश्चिदर्थं ततो नीत्वा क्रियते संग्रहो मया।
कृपाकटाक्षविक्षेपमत्र कुर्वन्तु साधवः ॥

समाप्तश्चायं ग्रन्थः ॥ शकाब्दाः १७२८ ॥

Besides the above-named authorities, quotations have been found from *Agnipurāṇa*, *Garuḍapurāṇa*, *Gopā(la)saṃhitā* (fol. 18*b*), the *Rāvaṇakṛitam Kumāratantram* (given entire foll. 242–245*a*), *Vāsudeva* (fol. 113*b*), *Vishṇu* (fol. 240*a*), *Sāralatikā* (fol. 4*b*).

In the Cat. Cat., the work has been entered under the title '*Rasakashāya*,' but this designation occurs only in the one colophon given above.

The MS. is very correct, and the work, being composed in a clear and easy style, might prove useful as an introduction to the study of the older authorities on which it is based.

Cf. Dietz, Anal. Med., p. 135.

[H. T. COLEBROOKE.]

## 2680.

**807.** Foll. 241; size 16¼ in. by 5¼ in.; clear, modern Bengali handwriting; eight lines in a page.

*Mugdhabodha*, a compilation from older sources on the treatment of different maladies, by *Mādhava Kavirāja*, of *Nāriṭagrāma*.

It begins:

गोपीनाथपदाम्भोजं चित्तं गाङ्गपयःकरं।
भक्तचित्तार्कसुखदं वन्दे किल्बिषनाशनं ॥

यत्प्रसिद्धं तदत्रापि यद्यद्रोगेषु यौगिकं।
औषधानि च पथ्यानि प्रमाणानि बहूनि च ॥

यदुक्तं वाभटे तन्त्रे सुश्रुते वैद्यसागरे।
अन्यैश्च बहुभिः सिद्धैर्वैद्यदुक्तं विलोक्य तत् ॥

तत्र यद्यदसाध्यं स्याद् यद्यद्देशेषु दुर्लभं।
तत्तत्सर्वं परित्यज्य सारभूतं मया कृतं ॥

मुग्धबोधमहं कुर्वे वैद्यशास्त्रमहाम्बुधौ।
संगृह्य सर्वसारं च वैद्यः श्रीमाधवः कविः ॥

सुगिरां वैद्यधीराणां प्रमोदाय मया कृतः।
सति ग्रन्थे च बालानां बोधाय तनुना पुनः ॥

कर्मजा व्याधयः केचिद् दोषजाः सन्ति चापरे।
कर्मदोषोद्भवाश्चान्ये कर्मजा देहसंश्रयाः ॥

यथाशास्त्रं विनिर्णीतो यथाव्याधि चिकित्सितः।
न शमं याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः ॥

स्वल्पदोषैर्गरीयान् यः स ज्ञेयः कर्मदोषजः।
कर्मक्षयात्कर्मकृतो दोषजं(? °जः) सुखमौषधैः।
कर्मदोषोद्भवा याति कर्मदोषक्षयात्क्षयं ॥

परं च।

कर्मप्रकोपेण कदाचिदेव दोषप्रकोपेण भवन्ति चान्ये।
तथापरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकाराः ॥

ये वा गदाः स्मरपरे द्रविणापहार-
गुर्वङ्गनागमनविप्रवधादिभिश्च ।
दुष्कर्मभिस्तनुभृतामिह कर्मजास्तु
नोपक्रमेण भिषजामुपयान्ति सिद्धिं ॥ °

After this the work agrees for some time with the preceding one.

It ends fol. 231*a*:

क्षुद्ररोगेषु सर्वेषु नानारोगानुकारिषु ।
दोषान्दूष्यानवस्थाश्च निरीक्ष्य मतिमान् भिषक् ॥
तस्य तस्य च रोगस्य पथ्यापथ्यानि कारयेत् ।
यथादोषं यथादूष्यं यथावस्थं च कारयेत् ॥

इति पथ्यापथ्यं ॥ इति क्षुद्ररोगचिकित्सा समाप्ता ॥ इति श्रीमाधवकविराजकृतायां मुग्धबोधाख्यायां ज्वरादिरोगचिकित्सा समाप्ता ॥

Then follows, on foll. 231*b*–241*b*, a list of contents, ending with a list of 22 authorities, of which the following may be mentioned:— (*śrīmat*) *Gahananātha, Candranātha, Caraka, Tantra, Tantranātha, Nidāna* (probl. *Mādhava's Rugviniścaya*), *Pātañjala, Bhāskara, Mahāsena, Māheśvara*(!), *Ratnāvalī, Vābhaṭa, Vṛiddha-Vābhaṭa, Vaidyasāgara, Sārakaumudī, Suśruta.*

This list is followed by: एतेषां मतमालोक्य मण्डलपाटीयनारिटग्रामनिवासिश्रीमाधवकविकृतमिदं ॥

Cf. Dietz, Anal. Med., p. 137.

[H. T. COLEBROOKE.]

## 2681.

**1580.** Foll. 171; size 17 in. by 5¼ in.; fair, modern Bengali writing by two different hands; nine (from fol. 127 eight) lines in a page.

*Sārakaumudī*, or *Cikitsā-sārakaumudī*, an anonymous work on the treatment of maladies.

It begins:

प्रणम्य परमानन्दवृन्दकन्दं गुरोः पदं ।
मन्दधीसाधुबोधाय साध्यते सारकौमुदी ॥
धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमं (फल° R. M.) ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥
क्वचिदर्थैः (°द्रमैः ib.) क्वचिद्धर्मैः (°कर्म ib.) क्वचिन्मित्रं
[क्वचिद्यशः ।
कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥
व्याधेस्तत्त्व परिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥
यावत्कण्ठगताः प्राणा यावन्नास्ति निरिन्द्रियं ।
तावच्चिकित्सा कर्तव्या कालस्य कुटिला गतिः ॥
चिकित्सितशरीरे तु यो न क्रोणाति दुर्मतिः ।
स यत्करोति सुकृतं तत्फलं भिषगश्नुते ॥
रोगमादौ परीक्षेत ततो ऽनन्तरमौषधं ।
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥
दर्शनस्पर्शनप्रश्नैः परीक्षा तु त्रिधा मता ।
दर्शनं मूत्रजिह्वाद्यैः स्पर्शनं नाडिकादिभिः ॥
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतं ॥°

इति सारकौमुद्यां संकीर्णाधिकारपरिच्छेदः ॥ fol. 2*b*; इति° शरीराधिकारः fol. 5*a*; इति° रोगनिरूपणाधिकारः fol. 5*b*; इति मूत्रजिह्वानासिकापरीक्षा fol. 6*a*; इति चिकित्सासारकौमुद्यां नाडीपरीक्षा fol. 6*b*; इति सार° परिमलनिरूपणं fol. 7*a*; इति चिकित्सा° परिभाषाप्रकाशः fol. 11*a*; इति सार° शस्त्रजलौकादिपातनदाहकर्मनिरूपणाधिकारः fol. 13*b*; इति स्नेहपानस्वेदनिरूपणं fol. 14*a*; इति विवेकनिरूपणं fol. 15*b*; इति वमनादिपञ्चकर्मपरिच्छेदः fol. 16*b*; इति° धूमपानकवलगण्डूषाञ्जनादिनिरूपणं fol. 17*a*; इति धातुनिरूपणं fol. 17*b*; इति देशनिरूपणं fol. 18*a*; इति° दिनाचरणपरिच्छेदः fol. 18*b*; इति° द्रव्याणां रसवीर्यविपाकप्रभावगुणनिरूपणपरिच्छेदः fol. 31*b*; etc.

It ends: इति विषशुद्धिः ॥

क्षीरेण परिपक्वायां स्वल्पामुपविषं सुधीः ।
दोलायन्त्रे पचेत्सम्यग् विशुध्यति न संशयः ॥

इति नैपालधुस्तूरादिबीजशुद्धिः ॥

मत्स्यादिपित्तं संशुष्कं निम्बद्रावैर्विभावितं ।
दिनान्ते शुद्धिमायाति सत्यं गुरुवचो यथा ॥

मत्स्यमयूरादिपित्तशुद्धिः ॥ उष्णे दशमूलक्काथे पूते गुग्गुलुं प्रक्षिप्यालोड्य वस्त्रपूतं विधाय । उपेक्ष्य विशोष्य घृतं दत्त्वा पचितं ग्राह्यं । त्रिफलाक्काथे इति कश्चित् ॥ इति गुग्गुलशुद्धिः॥ सातश्चकटुकीप्रभृतीनां (!) उष्णगोमयोदकेन शुद्धिर्लोकतो विज्ञातव्या ॥ इति सारकौमुद्यां शोधनाधिकारः ॥ समाप्तश्चायं ग्रन्थः ॥

The MS. is perhaps not quite complete; cf. Rāj. Mitra, Notices, vii., p. 286.

[H. T. Colebrooke.]

## 2682.

**798.** Foll. 170 (counted 171, no. 103 being passed over); size 10½ in. by 4½ in.; indifferent, modern Devanāgarī writing; ten lines in a page.

*Yogasaṃgraha*, a work on the treatment of maladies, composed, in 1616 A.D., by *ciraṃjīvamiśrī-Jagannātha*, son of *miśrī-Lakshmaṇa*, of the *Rāṭī-vaṃśa* (of the *Kāśyapakula*).

It begins: **यो व्यानशे विश्वमनेकमेको°** see Weber, Berl. Cat., no. 958.

We notice that the particular method of healing children's maladies by the recitation of magic spells, referred to in other works as "*Rāvaṇakṛitaṃ kumāratantram*," is here mentioned (fol. 124*b*) under the title of "*Rāvaṇakṛitir bālatantram*" (cf. under nos. 2679, 2698-9).

It ends: **इति श्रीमद्राटीवंशोद्भूतमिश्रीश्रीलक्ष्मणतत्पुत्रचिरंजीवमिश्रीश्रीजगन्नाथकृतः योगसंग्रहः समाप्तः ॥**

**वह्निसिंधुरसचंद्रसंज्ञके माधवे धवलपक्षसंयुते ।**
**भानुवारहरिवासरे तिथौ ग्रंथ एष परिपूर्णतां गतः ॥**

Cf. Dietz, Anal. Med., p. 129.

[H. T. Colebrooke.]

## 2683.

**2664.** Foll 89 (and a *śuddhapatra* after fol. 6); size 10 in. by 4¼ in.; indifferent Devanāgarī writing of about 1750 A.D.; 12-14 lines in a page.

*Sārasaṃgrahataraṅgiṇī*, or simply *Saṃgrahataraṅgiṇī*, a manual of therapeutics and dietetics, in twenty-three chapters (*taraṅga*), by *Śāma* (or *Śāmajī*, i.e. *Śyāmajī*) *Panta Vidvāṃsa*.

It begins:

**विघ्नराजचरणौ परिणम्य**
**पार्वतीशिवपदौ हृदि भाव्यौ ।**
**मंदवैद्यकजनाय करिष्ये**
**सारसंग्रहतरंगिणीनाम्नीं ॥ १ ॥**
**अल्पबुद्धिबलजीवनकाया**
**मानवाः कलियुगे ननुरायाः ।**
**ग्रंथराशिगहनानि रुजार्ताः**
**संभवंति गमितुं न हि शक्ताः ॥ २ ॥**
**गुरोरधीताखिलवैद्यविद्यः**
**पियूषपाणिः कुशलः क्रियासु ।**
**गतस्पृहो धैर्यधरः कृपालुः**
**शुद्धोऽधिकारी भिषगीदृशः स्यात् ॥ ३ ॥ °**

1. *vaidyapraśaṃsā-vātādidoshavarṇanam* (*śl.* 37), fol. 3*a*; 2. *ṛitukālādidharmavarṇanam* (*śl.* 32), fol. 5*a*; 3. *vayodeśaprakṛitibalavarṇanam* (*śl.* 24), fol. 6*b*; 4. *dhātūtpattidhātusthānagarbhotpādanādivarṇanam* (*śl.* 54), fol. 9*a*; 5. *garbhotthaduḥkhakumāragrahajanitapīḍāvarṇanam* (*śl.* 16), fol. 9*b*; 6. *dhānyaguṇavarṇanam* (*śl.* 34), fol. 11*a*; 7. *drākshāphalādiguṇavarṇanam* (*śl.* 59), fol. 14*a*; 8. *śākakandādivarṇanam* (*śl.* 44), fol. 15*b*; 9. *māṃsaguṇāguṇavarṇanam* (*śl.* 40), fol. 17*b*; 10. *pakvānnapānasnānabhojanayānaśayanādivarṇanam* (*śl.* 126), fol. 23*b*; 11. *ciruldhāhāravarṇanam* (*śl.* 36), fol. 25*b*; 12. *nidānavarṇanam* (*śl.* 159), fol. 33*b*; 13. *vātādijanitarogavarṇanam* (*śl.* 44), fol. 36*a*; 14. *nāḍyādiparīkshāvarṇanam* (*śl.* 47), fol. 38*b*; 15. *rogasvapnanakshatrādināsādhyāsādhyavarṇanam* (*śl.* 49), fol. 40*a*; 16. *ashṭajvaranidānalakshaṇavarṇanam* (*śl.* 81), fol. 45*b*; 17. *kvāthādiparibhāshāvarṇanam* (*śl.* 19), fol. 49*b*; 18. *cūrṇakalpanāguṇāguṇavarṇanam* (*śl.* 127), fol. 55*b*; 19. *dhātūpadhātuśodhanamāraṇam* (*śl.* 79), fol. 59*b*; 20. *rasakalpanāguṇāguṇavarṇanam* (*śl.* 220), fol. 70*b*; 21. *pākādivarṇanam* (*śl.* 112), fol. 76*b*; 22. *tailaghṛitādivarṇanam* (*śl.* 103), fol. 81*b*; 23. *nasyavidhidravyaguṇāguṇavarṇanam* (*śl.* 159).

It ends:

**शास्त्रसंग्रहनिघंटमतानां सारमेव सकलं परिगृह्य ।**
**शामपंतविदुषा रचिता वै सारसंग्रहतरंगिणिकेयं ॥**

मंदवैद्यमतिबोधनवेगालोचनाकलुषोज्झितरोगा ।
आगता सकलशास्त्रगिरिभ्यः पातु संग्रहतरंगिणिका सा॥
यो विद्वांसकुले द्विजातिविमले जातः सुधीः कीर्तिमान्
नाम्ना श्रामजिपंत शंकरपदांभोजानतः सन्नतः ।
दृष्ट्वा योगतरंगिणीं तु विविधान् ग्रंथान् लिलेख स्वयं
तत्संग्राहतरंगिणीं हि भुवने गंगामिव श्रेयसीं ॥ १५९ ॥

[H. T. COLEBROOKE.]

## 2684.

**2370.** Foll. 171; size $10\frac{3}{4}$ in. by $5\frac{1}{4}$ in.; good, modern Devanāgarī writing; ten lines in a page.

*Vīrasiṃhāvaloka*, a compilation from older sources on the threefold method of treatment of maladies—viz. prophylactic, piacular and empirical—by *Vīrasiṃha Deva*, son of *Devaśarman* (? *varman*) of the *Tomaravaṃśa*.

The arrangement of the subject followed by the author and the scientific basis of his system are those of the *Rugviniścaya*, while the prescripts of the *jātaka* and *karmavipāka* are merely tacked on under each head.

It begins:

यच्चक्षुर्भुवनस्य दिव्यममलं धाम श्रुतीनां परं
यद्वैकनिकेतनं च पयसां बीजं यदेकं परं ।
सत्रेष्वग्निहुतस्य वेदविदितं स्थानं च यत्सर्वदा
तद्वः पातु सनातनं हरिमहस्तस्वप्रबोधोदयं ॥ १ ॥
दैवज्ञागमधर्मशास्त्रनिगमायुर्वेददुग्धोदधीन्
आमथ्य स्फुरदात्मबुद्धिगिरिणा विश्वोपकारोज्ज्वलं ।
आलोकामृतमातनोति विबुधैरासेव्यमत्यद्भुतं
श्रीमत्तोमरदेवशर्मतनयः श्रीवीरसिंहो नृपः ॥ २ ॥

इह खलु पुरुषार्थचतुष्टयाय धीमतां प्रवृत्तिः । तत्राद्यो धर्मः स च शरीरमंतरेण न संभवति । तच्च रोगरहितं धर्मकर्मक्षमं भवति । तत्स्वरूपनिरूपणाय तद्दोषप्रतीकाराय च रोगाः परिगण्यंते । °

The other medical authorities that are adduced in various places are *Ātreya*, *Ārogyacintāmaṇi*, *Tīsaṭācārya*, *Vāgbhaṭa*, *Vṛinda(saṃgraha)*, and *Suśruta*. For astrology we are referred to *Śrīpati*, the *Sārāvalījātaka*, and others, while the sources for religious practices are different *Purāṇas* and *Tantras*.

It ends:

न श्रेष्ठास्तरणिप्रभावजनितो वंशः समालिख्यते
रामाद्याः पृथिवीश्वराः समभवन्यत्र प्रतापोन्नताः ।
नो वा यत्र युधिष्ठिरप्रभृतयो भूपा बभूवुस्ततः
सृष्टस्तोमरवंश एष विधिना सत्कर्मसंसेविना ॥ १ ॥
तत्राभवत् कमलसिंह इति प्रसिद्धः
सर्वागमाचरणसेवितदेवसिद्धः ।
तस्मादभूज्जगति भूपतिदेवशर्मा
विद्याविनोदमतिराद्भुतपुण्यकर्मा ॥ २ ॥
श्रीदेवशर्मात्मज एष धीरः स्वशस्त्रसंतापितशत्रुवीरः ।
श्रीवीरसिंहः क्षितिपालसिंहः शास्त्रत्रया[म]मिमं
[व्यधत्त ॥ ३ ॥

श्रीमत्कपिलमुनिप्रतिष्ठितकपिलस्थानीयटकारीवास्तव्ययाज्ञिकयज्ञानंदतनूजयाज्ञिकश्रीमधुसूदनात्मजयाज्ञिकश्रीनीलकंठात्मजयाज्ञिकश्रीगणेनंदात्मश्रीसज्जनाचरणारविंदमधुव्रतेन रामेण स्वपरोपकृतसुधानंदाय श्रीनारायणप्रीतये स्वयमलेखि ग्रंथो ऽयं ॥

The three *śāstras* referred to in verse 3 as having been written upon by the author (under the common title of *Vīrasiṃhāvaloka*) are law, astronomy and medicine. Cf. Aufrecht, Cat. Cat., *s v.*, where *Vīrasiṃha* is stated to have lived about 1375 A.D.

[GAIKAWAR.]

## 2685.

**1643b.** Foll. 31; size $9\frac{1}{2}$ in. by 5 in.; large, clear Devanāgarī writing of 1793 A.D. (from fol. 9*b* by a different hand from the rest); six lines in a page.

*Vaidyajīvana*, a treatise of five chapters (*vilāsa*) on pathology, by *Lolimbarāja*, son of *Divākara*.

It begins: अथ वैद्यजीवनपुस्तकं लिख्यते ॥ ° प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः °

See Dietz, Anal. Med., p. 135; Weber, Berl. Cat., no. 976. Variously published in India.

The leaves are marked वैद्य on the left, and संजीव on the right hand margin of the second page. [H. T. Colebrooke.]

## 2686.

**2651.** Foll. 16; size 10¾ in. by 6 in.; fair, modern Devanāgarī writing; ten lines in a page.

The same work. Cf. Dietz, Anal. Med., p. 156. [R. Johnson.]

## 2687.

**1753a.** Foll. 25; size 8¾ in. by 3¾ in.; fair Devanāgarī writing of about 1750 A.D.; seven lines in a page.

The same work.

In this MS. the last chapter has the following additional verse (not commented upon by *Rudrabhaṭṭa*):

राले वाले मर्दयेत्तुल्यभागं
ताभ्यां तुल्यं गैरिकं चूर्णितं च ।
लेपः कार्यो लोमशात्वे मुराशां (?)
स्मरादूषे लाललोलिंवराजः ॥ २५ ॥

Cf. Dietz, ib., p. 141.

[H. T. Colebrooke.]

## 2688.

**2071c.** Foll. 56; size 11¼ in. by 5¼ in.; clear, modern Devanāgarī writing; ten lines in a page.

*Vaidyajīvana*, with a commentary, called *Dīpikā*, by *Rudrabhaṭṭa*, son of *Koṇeribhaṭṭa* and *Cirajāmbī*.

Both text and commentary are described in the Oxf. Cat., no. 754; Dietz, Anal. Med., p. 154.

An edition of them was published at Bombay in 1874. [Gaikawar.]

## 2689.

**2180.** Foll. 78 (numbered 79, no. 59 having been passed over); size 11¼ in. by 6 in.; good, modern Devanāgarī writing; ten lines in a page.

The same works. Dietz, Anal. Med., p. 155. [Gaikawar.]

## 2690.

**1906.** Foll. 56; size 11¼ in. by 5¼ in.; good, modern Devanāgarī writing (foll. 1–40 by a somewhat older hand than the rest); eleven lines in a page.

The same works. Dietz, Anal. Med., p. 158. [J. Taylor.]

## 2691.

**2071b.** Foll. 29; size 11¼ in. by 5¼ in.; fair Devanāgarī writing of the latter part of last century; ten lines in a page.

*Hitopadeśa*, or *Vaidyakasārasaṃgraha*, a treatise on nosology and medicaments, by *Śrīkaṇṭha Śiva Paṇḍita*.

It begins:

भक्तेभ्यो भुवनाधिपत्यवरदं देवैर्महेंद्रादिभिः
शश्वत्स्वर्णकिरीटकोटिमणिभिः प्रोद्घृष्टपादांबुजं ।
संसारभ्रमभीतिशांतमनसो ध्यायंति यं योगिनस्
तं वंदे शशिखंडमंडितजटाजूटं भुवं धूर्जटिं ॥ १ ॥

आधिव्याधिहरं नतप्रियकरं नित्यप्रभावाकरं
चंद्रालंकृतशेखरं तृणमिव क्रोधाग्निदग्धस्मरं ।
भीमांधासुरघस्मर (? भीमांधा°) गजमुखक्रीडाभिज्ञाताहरं
वंदे दिव्यभुजंगभूषणधरं विश्वेश्वरं शंकरं ॥ २ ॥

यत्कर्णमारुतहता गिरयो युगांते
चूर्णीभवंति किल मेरुहिमाचलाद्याः ।
शुष्यंति सप्तसरितां पतयोऽपि नित्यं
वंदे तराय शमनाय गणेश्वरं तं ॥ ३ ॥

धन्वंतरिमतं जेतुं नालं वर्षशतैरपि ।
न हि क्षोभयितुं शक्यः सागरो ऽंगुलिचालनैः ॥ ४ ॥

तथापि तत्परिज्ञानप्रकाशपरया धिया ।
आद्यवैद्ययशोलेशमाप्तये क्रियते मया ॥ ५ ॥
हितोपदेशनामायं ग्रंथः श्रीकंठशंभुना ।
रोगिरोगापनोदाय क्रियते हि समासतः ॥ ६ ॥
रसायनं च धान्यानां विधिं वच्मि समासतः ।
गुणदोषानुरूपेण वैद्यसिद्धांतसंगतं ॥ ७ ॥

The colophons of the chapters (*samuddeśa*) run thus: इति परमशैवाचार्यश्रीकंठशिवपंडितविरचिते वैद्यकसारसंग्रहे हितोपदेशनाम्नि धान्यादिरसायनतद्गुणदोषविधिना प्रथमः समुद्देशः ॥ fol. 5*a*; इति श्रीहितोपदेशे शिरोरोगप्रतिकारे द्वितीयः समुद्देशः ॥ fol. 6*b*; इति श्रीकंठविरचिते वैद्यकसारसंग्र[हे] नयननासामुखगलरोगप्रतीकारनामा तृतीयसमुद्देशः ॥ fol. 8*b*; इति श्रीकंठशिवपंडितविरचिते वै० हि० नाम्नि हृद्रोगश्चतुर्थः ॥ fol. 10*b*; इति श्रीश्रीकंठपंडितविरचि[ते] हि० नाम्नि छर्दिजलोदरश्वासप्लीहजंतुपुष्टिकुक्षिकटिनाभिशूलषट्प्रमेहनामा पंचमः स० ॥ fol. 14*a*; इति श्रीश्रीकंठशिवपंडितविरचिते हि०नाम्नि कुरंडमूलव्याधिअतिसारग्रहणीश्लीपदरंघणीवात उरुस्तंभविषविकारोगप्रतीकारनामा षष्ठः स० ॥ fol. 18*a*; इति श्रीश्रीकंठशिवपंडितविरचिते वै०हे हि० नाम्नि लूताभगंदरज्वालागर्दभस्फोटगोधेरशीतलीशोफरोगप्रतीकारनामा सप्तमः स० ॥ fol. 21*b*.

The MS. is perhaps incomplete; the eighth chapter beginning with the treatment of कुष्ठरोग, and ending इति नवज्वरारिस्य(!)॥ समाप्तो ऽयं ग्रंथः ॥

An extra leaf at the end contains the title इति सन्निपातकलीका समाप्ता । written by a different hand; and the same hand has added this title in various abbreviations on the margin of several leaves of the MS.

Cf. Dietz, Anal. Med., p. 154; Aufrecht, Oxf. Cat., p. 317*a*, note.

[GAIKAWAR.]

## 2692.

**1753b.** Foll. 77; size 8¾ in. by 3¾ in.; good, clear Devanāgarī writing; seven lines in a page.

*Vaidyaratna*, a compendium of rules for medical practice, in seven chapters (*prakāśa*) and an appendix, composed by *Gosvāmin Śivānanda Bhaṭṭa.*

It begins:

नारदादिमुनिवृंदसेविता पारदादपि नितांतमुज्ज्वला ।
शारदामृतमरीचिभानना शारदा वसतु मे हृदंबुजे ॥
ये वैद्या अलसाः संति बृहद्ग्रंथावलोकने ।
तेषां कृते ऽतिसंक्षिप्तं वैद्यरत्नं वितन्यते ॥

तत्र नाडीज्ञानेन रोगे ज्ञाते भेषजस्य कर्तव्यत्वादादौ नाडीज्ञानं निरूप्यते ॥ अथ नाडीपरीक्षा ॥

सद्यःस्नातस्य भुक्तस्य तथा स्नेहावगाहिनः ।
क्षुत्तृषार्तस्य सुप्तस्य सम्यग् नाडी न बुध्यते ॥

It ends:

यामैश्चतुर्भिर्द्वाभ्यां च भोज्यभैषज्ययोः समे ।
पाको ऽग्नौ युक्तयोर्द्राक् तीक्ष्णे मंदे पुनश्चिरात् ॥

ग्रंथसंख्या ॥ ८७५ ॥ संवत् १८५३ फाल्गुण सदी पुरणवासी (*r.* पौर्णमासी) वार मंगलवार लिखितं वैनाथ (? *r.* वैद्यनाथ) ब्राह्मण देसवाली (*i.e.* دیس وال or inhabitant of) कोठ्याठी काना [*i.e.* خانه residence] राजमंदर [the royal palace].

The outside page of fol. 1 is marked वैद्यरत्नटीका, a mistake that was adopted by Dietz, Anal. Med., p. 142.

[H. T. COLEBROOKE.]

## 2693.

**126.** Foll. 76; size 9¼ in. by 4 in.; fair Devanāgarī writing of 1797 A.D.; 7–9 lines in a page.

The same work. This MS. is marked वैद्यविनोद on the outside page, without any apparent reason again.

Cf. Dietz, Anal. Med., p. 138.

[H. T. COLEBROOKE.]

## 2694.

**701.** Foll. 63; size 9½ in. by 4¼ in.; fairly good Devanāgarī writing of the latter part of last century; eleven lines in a page.

*Vaidyarahasya(-paddhati)*, a treatise on the practice of medicine, by *Vidyāpati* (son of *Vaṃśīdhara*).

It begins:

यन्नामस्मरणं समस्तदुरितध्वंसावहं पुण्यदं
भक्तानामभयंकरं सुखकरं सर्वार्थसिद्धिप्रदं ।
तं नत्वार्जुनमीश्वरं गुरुकृपाथामैः सुसिद्धैर्वरैर्
योगैर्वैद्यरहस्यमद्य तनुते विद्यापतिः कौतुकात् ॥ १ ॥
यतः समस्तरोगाणां ज्वरो राजेति विश्रुतः ।
अतो ज्वराधिकारो ऽत्र प्रथमं लिख्यते मया ॥ २ ॥
अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियां तत्र विदधीत चिकित्सकः ॥ ३ ॥ ०

For another MS., the first leaf of which seems to be wanting (the beginning there given being found on fol. 3*a*, l. 3, of the present MS.), see Rāj. Mitra, Notices, iii., p. 78. According to the final *ślokas* of that MS., the treatise was written for *Dyānatirāya*(?), of Bengal; and completed on the second day of the light fortnight of *Pausha*, of the (Saṃvat) year 1738 (1682 A.D.).

The present MS. had apparently lost a leaf at the end: on the last line of fol. 63*a* ends the *oshṭharogopakrama*, whilst the second page has been pasted over with a leaf containing a few lines in a different hand, made up for the purpose, and the colophon: इति श्रीविद्यापतिभट्टविरचितं वैद्यरत्ननामको(!) ग्रंथ समाप्तमिति ॥

Cf. Dietz, Anal. Med., p. 134.

[H. T. COLEBROOKE.]

## 2695.

**1967.** Foll. 39; size 6¾ in. by 5 in.; good, modern Devanāgarī writing; ten lines in a page.

*Vaidyavilāsa*, a popular treatise on the healing art, composed, in 1697 A.D., by *Raghunātha* (or *Raghava*) *Paṇḍita Kavīśvara* of the *Manoharakula*, a resident of Campāvatīpura (Bhāgalpur).

It begins:

अलिकुलसंकुलगंडं धृतशशिखंडं साधु(वरादि ed.)दोर्दंडं ।
लीलाकृष्टतशुंडं वंदे वरदेभवरतुंडं* ॥ १ ॥
पुराविदां वीक्ष्य हि योगसारं सतां मुदे द्राग्गदखंडनाय ।
सदुक्तिभाजा कविराघवेण वितन्यते वैद्यविलास एषः ॥ २ ॥
ये ये भिषग्भिः शतशो ऽनुभूता
मयापि तेषां कृपयानुलब्धाः ।
तानेव योगान्प्रवदामि यत्र
पूर्वं प्रयुक्तान्मुनिभिः प्रयत्नात् ॥ ३ ॥ [० ५ ॥ ed.]
अथ वातज्वरचिकित्सा । ०

It ends: [(?) ।

मधुमिलनमिदं सुधाधितं च मदनविलासरसद्विगुंजमात्रः
युवतिशतविवृद्धदर्पहारी कविवरपंडितराघवप्रणीतः ॥
इति मदनविलासरसः ॥ ० १०७ ॥ [१०६ ॥
चंपावतीपुरनिवासवतादरेण
संदर्भितश्च रघुनाथकवीश्वरेण ।
मोदाय वैद्यविदुषां गदखंडनाय
मान्यः सतां तमित(*r.*जयति) वैद्यविलास एषः ॥ १०८ ॥
ग्रहेंदुरसचंद्रे च शके विरचितो मुदा(मासि च कार्तिके ed.)।
तारणाब्दे विलासो ऽयं वैद्यपूर्णो विराजते† ॥ १०९ ॥ ०
मनोहरकुलांभोधे रघुनाथविधोर्भुवः ।
वागस्त्रैर्मै(*r.* वागुस्रैर्मै) रसज्ञानां हृत्पद्मं विकसत्विह ॥ [१११ ॥
सतां पदरजःसंगजातविस्फूर्तिराघवः ।
तस्य वाचां विलासो ऽयं न धत्ते स्फूर्तितां कथं‡ ॥ ११२ ॥
इति श्रीमन्मनोहरोपनामकरघुनाथपंडितविरचिते वैद्यविलासे षष्ठस्तरंगः ॥ पादरंचविधं ० 3 *ślokas*.

Cf. Dietz, Anal. Med., p. 157. A Bombay lithographed edition of the work has four additional chapters, with the colophon: इति श्रीवैद्यविलासे महाकाव्ये कविकुलावतंसरघुनाथपंडितकृतौ दशमस्तरंगः ॥

[DR. JOHN TAYLOR.]

* ? The ed., kindly collated by Prof. Bendall, reads this line: वंदे सुंदरशुंडं दानवचंडं द्विरदतुंडं ॥

† The edition reads for this line:
अयं वैद्यविलासश्च चरितो वृषवत्सरे ॥ ५२ ॥

‡ This verse is omitted in the ed., which has here our stanza 108, there counted 55. Moreover, the last topic of this chapter in the edition is इति द्रव्यप्रमाणं ॥

## 2696.

**1703b.** Foll. 38; size 9½ in. by 4 in.; fair Devanāgarī writing of 1786 A.D.; ten lines in a page.

*Āyurvedaprakāśa,* apparently a complete system of medicine, by *Mādhava* (*upādhyāya dvijavarya*), a resident of Benares, belonging to the *Sārasvata-kula* of Saurāshṭra.

The present MS. contains only a small portion of the work, consisting of three *adhyāyas,* and treating of the hygienic rules to be observed in the intercourse of the two sexes with a view to obtaining offspring.

It begins:

हरकोपानलेनैव भस्मीभूयाकरोत् स्मरः ।
अर्धनारीशरीरं हि यस्य तस्मै नमो ऽस्तु ते ॥
सम्यगाराधितः कामः सुगंधकुसुमादिभिः ।
विदधाति वरस्त्रीणां मानग्रंथिविमोचनं ॥
अनेककामशास्त्राणां सारमाकृष्य यत्नतः ।
बालव्युत्पत्तये स्त्रीणां चित्तसंतोषणाय च ॥
कामशास्त्रं प्रवक्ष्यामि नातिसंक्षिप्तविस्तृतं ।
आयुर्वेदागमे तद्धि यद्विना वृष्यना(? °ते) वृथा ॥
कामशास्त्रस्य तत्त्वज्ञा जायंते सुंदरीप्रियाः ।
कामशास्त्रमजानंतो रमंते पशुवत्स्त्रियं ॥
नानानिबंधाः सुरतोपचारैः
क्रीडासुखं जन्मफलं नराणां ।
किं सौरभेयीशतमध्यवर्ती
वृषो ऽपि संयोगसुखं न भुंक्ते ॥
स्वनारीरक्षणं पुंसां परनार्यनुरंजनं ।
बंधभेदेंगितज्ञानमेतत्फलमुदाहृतं ॥
मुक्तिमत्यपि कारणमेतच्छास्त्रमित्याह । °

It ends:

क्षीरं पीत्वा रमेद्रामां कामव्याकुलितान्वितां ।
मुखस्थां धारयेद्धस्ते(?) तदा वीर्यं न मुंचति ॥
इति वीर्यरोधिनी गुटिका ॥

इति सौराष्ट्रदेशोद्भवकुलावतंस उपाध्यायद्विजवर्यमाधवविरचिते आयुर्वेद[प्र]काशे उपशारीरके स्त्रीलक्षणसेवनादिकामशास्त्रविषयनिरूपणाध्यायः ॥ संवत् १८४३ ॥

[H. T. COLEBROOKE.]

## 2697.

**2478.** Foll. 114; size 11 in. by 5¼ in.; good, clear Devanāgarī writing of the latter part of last century; ten lines in a page.

*Āyurvedaprakāśa.* Another section, treating of the preparation of mercury and other mineral substances for medical purposes. It begins:

अर्थप्रकाशकासारविमर्शाबुजनीमयं(*r.* °जिनीमयं) ।
सच्चिदानंदविभवं शिवयोर्वपुराश्रये ॥ १* ॥
देवेंद्रमौलिमंदारमकरंदकणातृणा(? °वृताः) ।
विघ्नं हरंतु हेरो(*r.* हेरं)बचरणांबुजरेणवः ॥ २ ॥
अधुना रसरजस्य(*r.* रसराजस्य) संस्कारान्संप्रवक्ष्महे ।
नानातंत्राणि संदृश्य भिषजां सिद्धिहेतवे ॥ ३ ॥
संस्काराः परतंत्रेषु ये गूढाः सिद्धिसूचिताः ।
तानेव प्रकटी[क]र्तुमुद्यमं किल कुर्महे ॥ ४ ॥
ग्रंथादस्मादाहरंति प्रयोगान् स्वीयं वास्मिन्नामधेयं ति(!) ।
गोत्राण्येषामस्मदीयश्रमोष्मा भस्मीकुर्वन्नायुगं बोभवीतु ॥५॥
अश्रौषं बहुविदुषां मुखादपश्यं
शास्त्रेषु स्थितमकृतं न तल्लिखामि ।
यत्कर्म व्यरचयमग्रतो गुरूणां
प्रौढानां तदिह वदामि वीतशंकः ॥ ६ ॥ ° १० ॥
क्वचिच्छास्त्रे क्रिया नास्ति कर्मसंख्या न च क्वचित् ।
रसयुक्तिः क्वचिन्नास्ति संप्रदायः क्वचिन्न च ॥ ११ ॥
अतः सिद्धिर्न सर्वत्र रसे वापि रसायने ।
वैद्यवादे प्रयोगे च तस्माद्यत्नो मया कृतः ॥ १२ ॥
यद्गुरुमुखोन्नीतं स्वानुभूतं च यन्मया ।
तत्र लोकहितार्थाय वक्ष्याम्यनतिविस्तरं ॥ १३ ॥ ° ॥

Fol. 38*b*: इति श्रीसौराष्ट्रदेशोद्भवसारस्वतकुलावतंस उपाध्यायमाधवविरचितायुर्वेदप्रकाशे सूतसाधनाध्यायः समाप्तः ॥

The second chapter begins: गंधो हिंगुलमभ्रतालकशिलाः । °

It ends: इत्यायुर्वेदप्रकाशे श्रीमदुपाध्यायसारस्वतकुलावतंसकासि(*r.* काशी)निवासिमाधवविरचिते विषो[प]विषादिसाधनाध्यायः समाप्तः ॥

Of quotations we have noted the following: *Yogataraṅgiṇī,* fol. 110*a*; *Laghuyogataraṅgiṇī,*

---

* Cf. v. 1 of the *Rasendracintāmaṇi,* Berl. Cat., no. 967 (*r.* °*nimayam*); and Oxf. Cat., no. 762.

fol. 51*a*; *Rasacintāmaṇi*, foll. 23*b*, 31*a*, 36*b*; *Rasapaddhati*, foll. 53*a*, 66*b*, 74*a*, 84*b*; *Rasaratnākara*, foll. 12*b*, 15*b*; *Vāgbhaṭa* (or *Rasavāgbhaṭa*), foll. 43*a*, 46*a*, 45*b*.

Cf. Dietz, Anal. Med., p. 155.

[GAIKAWAR.]

## 2698, 2699.

**1433, 1434.** Foll. 1–254 and 255–508 (of which 444 is passed over); size 12¼ in. by 4¼ in.; fairly good Devanāgarī writing of 1805 A.D.; seven lines in a page. [A.]

*Cikitsāsārasaṃgraha*, a work on pathology and materia medica, by *Vaṅgasena*, son of *Gadādhara*, whose family came originally from the *Kāntika* (*v. l. Kāñjika*, Camb. Add. MS. 1707, p. ult.) country.

The work has been published by *Pandit Nand Kumar Gosvami Baidya*, Calc. 1889.

The MS. begins:

नत्वा शिवं प्रथमतः प्रणिपत्य चंडीं
वाग्देवतां तदनु तातपदं गुरूंश्च(गुरूं च ed.) ।
संगृह्यते किमपि यत्सुजनास्तदत्र(यत्सुजनैस्त° ed.)
चेतो विधातुमुचितं मदनुग्रहेण(°चितस्तद° ed.) ॥

हे दुर्जनाः(हेतुर्जनः ed.) परगुणेषु भवादृशानां
द्वेषः किमेष सहजो गुणतापहारी ।
याच्यापि(r. याञ्चापि) दैन्यफलभूरिफला तदानीं
तादृग्विधस्य मिथुनस्य विमोचनाय ॥

कांतिकावासनिर्यात(निर्जात ed.)श्रीगदाधरसूनुना ।
क्रियते वंगसेनेन चिकित्सासारसंग्रहः ॥

हृदि तिष्ठति यस्यैष चिकित्सासारसंग्रहः ।
स निदानचिकित्सायां न दरिद्रात्यसौ भिषक् ॥

धर्मार्थकाममोक्षाणामारोग्यं मूलसाधनं(मूलमुत्तमं ed.) ।
रोगास्तस्य प्रहर्तारः श्रेयसो जीवितस्य च ॥

तेषां प्रशमनोपायमतिदुर्वारं रंहसा ।
ब्रूमहे नातिविस्तीर्णं सनिदानचिकित्सितं ॥

निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ।
संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥

निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ॥°

The chapters are not numbered and no authorities are quoted except a few semi-mythical ones, such as *Agasti*, fol. 432*a*, l. 2 inf.; *Kapila*, fol. 20*b*, 6; *Bhāradvāja*, fol. 384*b*, 4 inf. Others are doubtful, such as the *Kaumāratantra*, which is ascribed to *Pārvatī* in one place (fol. 396*a*, 1 inf. = 350*b*, 3 inf. of MS. B), while in others (402*b*, 5; 409*b*, 2; 411*a*, 6) we have a *Kumāratantra* attributed to the son of *Rāvaṇa* (cf. under nos. 2679, 2682). *Nāgārjuna* is mentioned as the author of a *Yogasāra* (fol. 382*a*, 1) which is, perhaps, the same work as the *Yogaratnāvalī*, fol. 412*a*, ll. 3, 8; 412*b*, 3 inf.; a *Prayogasāra* being also quoted without an author's name in foll. 402*a*, 4 inf.; 409*a*, 4; 410*a*, 5 inf.; 411*b*, 4; 412*a*, 5; 412*b*, 3. The whole of that section, from fol. 402*a*, 7 to 413*b*, 5, in which these quotations occur, and which seems to be an extract from the *Kaumāratantra*, if not the *Kaumāratantra* itself, is left out in MS. B, 358*a*, l. A *Rogasaṃgraha* is quoted on fol. 382*a*, 1, for which, however, B (fol. 336*b*, 7) reads *Yogasaṃgraha*.

The work, however, on which *Vaṅgasena* relies for every statement, in his pathological part at least, and the title of which is nowhere mentioned, is again *Mādhava's Rugviniścaya*. The borrowing from it is not limited to single verses every now and then, but extends to entire chapters as well as to the classification of the subject in general. To conclude from a comparison of some of the chapters in the beginning, the middle and towards the end, the whole of *Mādhava's* text seems to be incorporated in this work.

In the other parts, *Suśruta* appears to be the authority chiefly made use of. The last

subject, for instance, that is treated of in this MS. (fol. 502*b*, 2 inf. to 507*b*, 4 inf.) is a dissertation on omina and portenta by which the physician has to be guided in his prediction of the probable issue of the malady. With the exception of a few alterations and transpositions, this will be found identical with *adhyāyas* 28–31 of *Suśruta's Sūtrasthāna* (vol. i., 102–117).

The Cambridge Library possesses in Add. 1707 (=No. 26 in Daniel Wright's History of Nepal, p. 324) two portions of this work, in 151 leaves, numbered 1–100 and 501–551. Though there it is called *Vaidyavallabha*, and differs a good deal in the latter portion with regard to the particular extracts that are selected for the text, there can be no doubt that it is substantially the same work as ours. Under these circumstances, the copyist's date (Nepal Saṃvat 396, *i.e.* A.D. 1276) affixed to the Camb. MS. is of some interest as fixing *Vaṅgasena's* time *before* the second half of the 13th century at least.

The concluding verse, in which our MS. agrees with the Camb. MS., runs thus in the better reading of the latter:

योऽयं मया चिरपरिश्रमतः कथंचित्
संवर्धितो जगति कीर्तिलताप्ररोहः ।
सोऽयं भवेन्न यदि गोभिरलं खलानां
छिन्नोऽद्य केन न सकौतुकमोक्षितः स्यात् ॥

In the edition this verse is not found, but there are four *ślokas* called "*vaṅgasenotpatti*," which do not, however, add any new information about the author.

In two colophons (fol. 413*b*, l. 5, and at the end), the copyist *Bhagavanta*, a *kāyath* residing at *Rāmāpurā*, has substituted the author's name for the name of the book.

Cf. Dietz, Anal. Med., pp. 145, 150.

[H. T. COLEBROOKE.]

## 2700.

**979.** Foll. 387, besides a double fol. 83; size 14½ in. by 5½ in.; fair Devanāgarī writing; 11–13 lines in a page. [B.]

